# VEDIC LANGUAGE & LITERATURE

## M.A. (Sanskrit)

## Semester-III, PAPER-I


**Director**

**Dr. Nagaraju Battu**

M.H.R.M., M.B.A., L.L.M., M.A. (Psy), M.A., (Soc), M.Ed., M.Phil., Ph.D.

Centre for Distance Education

Acharya Nagarjuna University

Nagarjuna Nagar-522510

Phone No.0863-2346208, 0863-2346222,

0863-2346259 (Study Material)

Website: www.anucde.info

e-mail: anucdedirector@gmail.com

## *FOREWORD*

***Since its establishment in 1976, Acharya Nagarjuna University has been forging ahead in the path of progress and dynamism, offering a variety of courses and research contributions. I am extremely happy that by gaining 'A' grade from the NAAC in the year 2016, Acharya Nagarjuna University is offering educational opportunities at the UG, PG levels apart from research degrees to students from over 443 affiliated colleges spread over the two districts of Guntur and Prakasam.***

***The University has also started the Centre for Distance Education in 2003-04 with the aim of taking higher education to the door step of all the sectors of the society. The centre will be a great help to those who cannot join in colleges, those who cannot afford the exorbitant fees as regular students, and even to housewives desirous of pursuing higher studies. Acharya Nagarjuna University has started offering B.A., and B.Com courses at the Degree level and M.A., M.Com., M.Sc., M.B.A., and L.L.M., courses at the PG level from the academic year 2003-2004 onwards.***

***To facilitate easier understanding by students studying through the distance mode, these self-instruction materials have been prepared by eminent and experienced teachers. The lessons have been drafted with great care and expertise in the stipulated time by these teachers. Constructive ideas and scholarly suggestions are welcome from students and teachers involved respectively. Such ideas will be incorporated for the greater efficacy of this distance mode of education. For clarification of doubts and feedback, weekly classes and contact classes will be arranged at the UG and PG levels respectively.***

***It is my aim that students getting higher education through the Centre for Distance Education should improve their qualification, have better employment opportunities and in turn be part of country's progress. It is my fond desire that in the years to come, the Centre for Distance Education will go from strength to strength in the form of new courses and by catering to larger number of people. My congratulations to all the Directors, Academic Coordinators, Editors and Lesson-writers of the Centre who have helped in these endeavours.***

**Prof. P. Raja Sekhar**
**Vice-Chancellor**
**Acharya Nagarjuna University**

जगद्संचालनम् अस्य विशिष्टं कार्यमस्ति। सूर्य: अस्य नेत्र:, वायुश्चास्य श्वास-प्रश्वासौ। नैतिक-अध्यक्षस्य अस्य पाश-भृतस्य वरुणस्य नियमा: अतीव क्लिष्टा: सन्ति। असुर:, क्षत्रिय:, धृतव्रत:, उरुशंस:, दूतदक्ष:, ऋतगोपा, मायावी, स्वराट् इत्यादयश्च अस्य उपाधय: सन्ति। द्युस्थानीय:, 12 सूक्तात्मक: देवता।

★ **उषस्**–उच्छतीति उषा। प्रात:कालस्य देवी, सूर्यपत्नी, सूर्यभगिनी सूर्यमाता वा उषा स्वर्णिम-वस्त्र-सुसज्जिता नवयौवना नर्तकी इव वेदेषु दरीदृश्यते। द्यौ: अस्य पिता, रात्रिश्चास्या: भगिनी अस्ति। रक्तवर्णा: बलशालिन: अश्वा: अस्या: स्वर्णिमरथं वहन्ति। इयं कदापि सोमपानं न करोति। मघोनी, रेवती, ऋतावरी, अश्ववती, गोमती, अह्नां नेत्री, पुराणी, सूनरी, भास्वती, अर्जुनी, ऋतपा, सुभगा, विश्ववारा, गवांमाता, सुजाता, हिरण्यवर्णा, अन्तिवामा, दिव:दुहिता, अमृता, अरुषा, सुप्रतीका, भद्रा, सुदृशीक-संदृक्, अमृत्य- केतु:, युवति: इत्यादयश्च अस्या: उपाधय: सन्ति। द्युस्थानीय:, 20 सूक्तात्मक: देवता।

★ **सोम:**–स्वर्गशिशो: सोमस्य वास्तविक-निवासस्थानं स्वर्ग एव। श्येनेन पृथिव्यामानीत: ओषधिस्वरूप: अयम् अमरत्व-प्रदाता सोम: वनस्पतीनां राजा, इन्द्रस्य प्रियतम: पेयश्चास्ति। वनस्पति:, वाचस्पति:, विश्वचर्षणि:, शुचि:, उत्तमं हवि:, औषधिपति:, रक्षोहा, वृत्रहन्ता, महिष्ठ:, अमर्त्य:, सहस्रधार:, इन्द्रपीत:, पवमान:, मधुमान्, अमृत:, शुद्ध:, शुक्र:, सोम:, दिव: शिशु:, मौञ्जवत् इत्यादयश्च अस्य उपाधय: सन्ति। पृथ्वी-स्थानीय:, 150 सूक्तात्मक: देवता।

# 7. प्रसंगप्राप्त-वैदिक-सूक्तानि
## (Prescribed Vedic Hymns)

यू.ज़ी.सी.नेट-पाठ्यक्रमे यानि सूक्तानि निर्धारितानि सन्ति तेषां संक्षिप्त-विवरणम् अत्र प्रस्तूयते–

## 7.1.अग्निसूक्तम् (ऋग्वेद 1.1.)

अग्निमित्यादिसूक्तं नवर्चम् 'अग्निं नव मधुच्छन्दा वैश्वामित्र:' इत्यनुक्रमणिकायाम् उक्तत्वात्। विश्वामित्रपुत्रो मधुच्छन्दो नामकस्तस्य सूक्तस्य द्रष्टत्वात् तदीय ऋषि:। '**ऋष् गतौ**' इति धातु:। सर्वधातुभ्य: इन्' (उ.सू. 4/557) '**इगुपधात् कित्**' (उ.सू.4/559)। सूक्तेऽस्मिन् स्तूयमानत्वाद् अग्निर्देव:। 'दिवा वै नोऽभूदिति तद् देवानाम् देवत्वम् इति। अतो दीव्यतीति देव:। मन्त्रेण द्योतते इत्यर्थ:। यथा राज्ञ: पुरोतिस्तदभीष्टं सम्पादयति, तथाग्निरपि यज्ञस्य अपेक्षितं होमं सम्पादयति। यज्ञस्य सम्बन्धिनि पूर्वभागे आहवनीयरूपेण अवस्थित: भवति। अत एव '**होता**' इत्यभिधीयते–''**अग्निर्वै देवानां होता**'' (ऐ.ब्रा. 3/14)

अत्र अग्नि-शब्दस्य यास्को बहुधा निर्वचन दर्शयति (नि.7/14), यथा अग्रणीर्भवति। अग्रं यज्ञेषु प्रणीयते। अंगं नयति सन्नममान:। अक्नोपनो भवति इति स्थौलाष्ठीवि:, न क्नोपयति न स्नेहयति। देवसेनामग्रे स्वयं नयतीत्यग्रणी:। तथा च ब्राह्मणान्तरम् ''**अग्निर्वै देवानां सेनानी:**'' इति। एतदेवाभिप्रेत्य बह्वृचामन्त्रब्राह्मणे आमनन्ति ''**अग्निर्मुखं प्रथमो देवतानाम्**'' (ऐ. ब्रा. 1/4) इति मन्त्र:। तथा तैत्तिरीयाश्चाममन्ति–''**अग्निरग्रे प्रथमो देवतानाम्**'' (तै. ब्रा. 2/4/3/3)। वाजसनेय-नस्त्वेमामनन्ति–''**स वा एषो अग्रे देवतानामजतायत तस्मादग्निर्नाम**'' इति। अयम् अग्नि: रमणीयानां धनानां दातृममस्ति। अतएव '**रत्नधातमं**' विशेषणम् अपि लभते।।

**अग्निमीळे पुरोहितं, यज्ञस्य देवमृत्विजम्।**
**होतारं रत्नधातमम्॥1॥**

ऋग्वेदस्य प्रथम-मण्डलस्य प्रथम-सूक्तस्य प्रथम: मन्त्रोऽयम् अग्ने: स्तुतिम् उपस्थापयति। अग्नि: देवता। विश्वामित्र-पुत्रो मधुच्छन्दा ऋषि:। गायत्री छन्दश्च। अत्र भगवान् वेदपुरुष: आह, –अग्नि-नामकं देवम् ईळे स्तौमि। ''ईड् स्तुतौ'' इति धातु: डकारस्य ळकारो बह्वृचाध्येतृ सम्प्रदाय-प्राप्त:, तथा च पठ्यते ''**अज्मध्यस्य डकारस्य ळकारं बह्वृचा जगु:। अजमध्यस्य डकारस्य ळ्हकारं वै यथाक्रमम्**'' इति। मन्त्रस्य होत्रा प्रयोज्यत्वाद् अहं स्तौमि इति लभ्यते। अयमग्नि: यज्ञस्य अपेक्षितं होमं सम्पादयति। अर्थात् देवानां यज्ञेषु होतृ-नामक: ऋत्विक् अग्निरेव। तथा च श्रूयते,–''**अग्निर्वै देवानां होता**'' (ऐ.ब्रा. 3/14) इति। अयमग्नि: कीदृश:? रत्नधातमं, यागफल-रूपाणां रत्नानाम् अतिशयेन धारयितारं पोषयितारं वा।।

**अग्नि: पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।**
**स देवाँ एह वक्षति॥2॥**

ऋग्वेद-संहिताया: प्रथम-मण्डलस्य प्रथम-सूक्तस्य अग्नि-विषयके मन्त्रेऽस्मिन् भगवान् वेदपुरुष: आह,–अयम् अग्नि: पूर्वेभि: पुरातनै: भृग्वंगिरस्-प्रभृतिभि: ऋषिभि: ईड्य: स्तुत्य:, नूतनै: उत इदानींतनै: अस्माभि: अपि स्तुत्य:। स: अग्नि: स्तुत: सन् इह यज्ञे देवान् हविर्भुज: आ वक्षति। 'वह्' प्रापणे इति धातु:। आवहतु इत्यर्थ:। पूर्वेभि: इत्यत्र 'बहुलं छन्दसि' दति भिस् ऐसादेशाभाव:। ''नवस्य नूत्नप्तनखाश्य'' इति वार्तिकेन नवशब्दस्य 'नू' इत्यादेश:। स च लोप: शाकल्यस्य'' इति लुप्यते।।

**अग्निना रयिमश्नवत्पोषमेव दिवे दिवे।**
**यशसं वीरवत्तमम्॥3॥**

ऋग्वेदस्य आदिमे सूक्ते भगवान् वेद आह, अग्निनेति। योऽयं होता स्तुत्योऽग्नि: तेन अग्निना निमित्त-भूतेन यजमानो रयिं धनम् अश्नवत् प्राप्नोति। तद्दिवे दिवे पोषमेव प्रतिदिनं पुष्यमाणतम्

वर्धमानमेव न तु कदाचिदपि क्षीयमाणम्। यशसं दानादिना यशोयुक्तम् वीरवत्तमम्, अतिशयेन पुत्र-भृत्यादि-वीरपुरुषोपेतम्। सति हि धने पुरुषाः सम्पद्यन्ते। रयिशब्दो मघमित्यादि-धननामसु पठितः (नि.2.10.8)। अश्नोतेर्धातोर्लेटि व्यत्ययेन तिप्। "**इतश्च लोपः**" इति इकारलोपः। "**लेटोऽडाटौ**" इत्यडागमः। ततोऽश्नवत् इति भवति।।

**अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि।**
**स इद्देवेषु गच्छति॥ 4॥**

अग्नेः वैशिष्ट्यम् उद्भासयन् भगवान वेद आह, अग्ने यम् इति। हे अग्ने! यं यज्ञं त्वं विश्वतः सर्वासु दिक्षु प्राप्तवान् असि, स इत् स एव यज्ञो देवेषु तृप्तिं प्रणेतुं स्वर्गे गच्छति। कीदृशं यज्ञः अध्वरं हिंसा-रहितम् । न ह्यग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं प्रभवन्ति। विश्वतः इत्यत्र तसिल प्रत्यय-स्वरत्वं बाधित्वा पूर्व-वर्णस्य 'लिति' इति उदात्तत्वम्।।

**अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः।**
**देवो देवेभिरागमत॥ 5॥**

इमाम् ऋचम् आश्रित्य भगवान् वेद आह, अग्निरिति। अयम् अग्निदेवः अन्यैः देवैः हविर्भोजिभिः सह आगमत् अस्मिन् यज्ञे समागच्छतु। कीदृशोऽयमग्निः? होता होम-निष्पादकः, यथोक्तमादिमे मन्त्रे "**होतारं रत्नधातमम्**" तथा "**अग्निर्वै देवानां होता**" (ऐ.ब्रा. 3.14)। **कविक्रतुः**। कवि-शब्दोऽत्र क्रान्तवचनो न तु मेधाविनाम्। **क्रतुः** प्रज्ञानस्य कर्मणो वा नाम। ततः क्रान्तप्रज्ञः क्रान्तकर्मा वा। सत्य अनृत-रहितः फलम् अवश्यं प्रयच्छतीत्यर्थः। चित्रश्रवस्तमः। श्रूयते इति श्रवो कीर्तिः। अतिशयेन विविधकीर्तियुक्तः कविक्रतुः चित्रश्रवस्तमः इत्यत्रोभयत्र बहुव्रीहित्वात् पूर्वपद-प्रकृतिस्वरत्वम्। सत्सु साधुः सत्यः "सत्यादशपथे" (पा. सू. 5.4.66)। लोडन्तस्य गच्छतु, इति शब्दस्य छत्वाभावः। उकार-लोपश्च छन्दसः। ततो रूपं गमत् इति भवति।।

**यदङ्ग दाशुषे त्वमग्ने यद् भद्रं करिष्यसि।**
**तवेतत्सत्यमङ्गिरः॥ 6॥**

अग्नेः वैशिष्ट्यं प्रस्तौति मन्त्रेऽस्मिन् भगवान् वेदः यदंगेति। अङ्ग इत्याभिमुखीकरणार्थो निपातः। अंग अग्ने। हे अग्ने! त्वं दाशुषे हविर्दत्तवे यजमानाय तत्प्रीत्यर्थे यद् भद्रं वित्त-गृह-प्रजा-पशु-रूपं कल्याणं करिष्यसि तद् भद्रं तव इत् तवैव। सुखहेतुरिति शेषः। हे अङ्गिरः! अग्ने! एतच्च सत्यं न त्वत्र विसंवादोऽस्ति। यजमानस्य वित्तादि-सम्पत्तौ सत्याम् उत्तरक्रत्वनुष्ठानेननाग्नेरेव सुखं भवति। भद्र-शब्दार्थे शाट्यायिनः समामनन्ति '**यद्वै पुरुषस्य वित्तं तद् भद्रं प्रजाभद्रं पशवो भद्रं**" इति। अंग-शब्दस्य निपातत्वेऽपि अभ्यादित्वाद् अन्तोदात्तत्वम्। 'अंगिरा अंगाराः' इति यास्कः। ऐतरेयिणोऽपि प्रजापतिदुहितृध्यानोपाख्याने समामनन्ति "**येऽङ्गाराः आसंस्तेऽङ्गिरसोऽभवन्**" (ऐ.ब्रा. 3.34) इति तस्मादङ्गिरो नामकमुनिकारणत्वात् अंगाररूपस्य अग्नेः अङ्गिरस्त्वम्। अत्र पदात् परत्वेनाष्टमिकानुदात्तत्वम्।।

**उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्।**
**नमो भरन्त एमसि॥ 7॥**

अग्नि-सूक्तस्य मन्त्रेऽस्मिन् भगवतः अग्नेः स्तुतिं प्रतिपादयन् भगवान् वेदपुरुषः आह, हे अग्ने! वयम् अनुष्ठातारो दिवे-दिवे प्रतिदिनं दोषावस्तः रात्रावहनि च धिया बुद्ध्या नमो भरन्तः नमस्कारं सम्पादयन्तः उप समीपे त्वां एमसि त्वाम् आगच्छमः। उपशब्दस्य निपातस्वरः "**त्वामौ द्वितीयायाः**" (पा. सू. 8.1.23) इति। युष्मच्छब्दस्य अनुदात्तस्त्वादेशः। दोषाशब्दो रात्रिवाची। वस्तरित्यहर्वाची। द्वन्द्वसमासे कार्तकौजपादित्वात् (पा.सू.6.2.37) आद्युदात्तः।

**राजन्तमध्वराणां गोपामृतस्य दीदिविम्।**
**वर्धमानं स्वे दमे॥ 8॥**

अग्नेः व्यक्तित्वम् उद्भावयन् भगवान् वेद आह, राजन्तमिति। पूर्वमन्त्रे, त्वामुपैम इत्यग्निमुद्दिश्य उक्तम्। कीदृशं त्वाम्। राजन्तम् दीप्यमानम् अध्वराणां राक्षसकृत-हिंसा-रहितानां यज्ञानां गोपां रक्षकम् ऋतस्य सत्यस्य अवश्यमभाविनः कर्मफलस्य दीदिविम् पौनःपुन्येन भृशं वा द्योतकम्। आहुत्याधारम् अग्निं दृष्ट्वा शास्त्रप्रसिद्धं कर्म-फलं स्मर्यते। स्वे दमे स्वकीय-गृहे यज्ञ-शालायां हविर्भिः वर्धमानम्। राजन्तं वर्धमानमिति अत्रोभयत्र पूर्ववत् धातुस्वरः शिष्यते।

**स नः पितेव सूनवेऽग्ने सूपायनो भव।**
**सचस्वा नः स्वस्तये॥ 9॥**

ऋक्.1.1. इति क्रमांकस्य अग्नि-सूक्तस्य अन्तिमे मन्त्रे अग्निदेवस्य स्तुतिं कुर्वन् भगवान् वेद-पुरुषः आह, स नः पितेवेति। हे अग्ने! स त्वं नः अस्मदर्थं सूपायनः शोभनप्राप्ति-युक्तः भव, तथा नः अस्माकं स्वस्तये विनाशराहित्यार्थं सचस्व समवेतो भव। तत्रोभयत्र दृष्टान्तः। यथा सूनवे पुत्रार्थं पिता सुप्रापः प्रायेण समवेतो भवति तद्वत्। अन्यच्च उद्धरणं द्रष्टव्यम्—

**त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचम्।**
**त्वं पुत्रो भवसि यस्तेऽविधत् त्वं सखा सुशेवः पास्याधृषः॥**
**—ऋक्संहिता॥ 2.1.9॥**

**अग्निं मन्ये पितरमग्निमापिमग्निं भ्रातरं सदमित् सखायम्।**
**—ऋक्संहिता॥ 10.7.3॥**

**पितेव सोम सूनवे सुशेवः ॥ ऋक्संहिता 8.48.4॥**
**वयं स्याम मातुर्न सूनवः ॥ ऋक्संहिता 7.81.4॥**

## 7.2. वरुणसूक्तम् (ऋक्. 1.25)

'यच्चित्' इति एकविंशतिमन्त्रात्मकस्य सूक्तस्यास्य ऋषि: शुन:शेप:। गायत्रीछन्द:। वरुणो देवता। सूक्तेऽस्मिन् वरुणस्य स्तुतिं कुर्वन् शुन:शेपो ब्रूते, हे वरुण! यथा लोके प्रजा: कदाचित् प्रमादमपि कुर्वन्ति, तथैव तव-सम्बन्धि अस्माकं व्यवहारं यत् प्रमादम् भवति, तत् क्षम्यताम्। तव कृपाप्राप्त्यर्थं वयं स्तुतिभि: तव मन: प्रसादयाम:। यथा पक्षिण: निवासस्थानानि प्राप्नुवन्ति, तथैव जीवन-प्राप्त्यर्थं मे मन: अतिशयेन तव स्तुतौ प्रसरति। य: आकाशमार्गेण गच्छतां पक्षिणां मार्गाणि वेद, य: समुद्रेऽवस्थित: नाव: मार्गं जानाति, य: धृतव्रत: उत्पद्यमान् प्रजायुक्तान् चैत्रादीन् द्वादश-मासान् जानाति, य: वायो: मार्गं वेद, स: धृतव्रत: वरुण: प्रजानां साम्राज्यसिद्ध्यर्थं जलगृहेषु निषषाद। तत्रैव स्थित: सन् स: वरुण: पूर्वसंपादितानि अन्यान्यश्चर्यमयानि कर्तव्यानि च सर्वतोऽवलोकयति। एतादृश: सुक्रतु: अदिते: पुत्र: वरुण: अस्मान् शोभनमार्गेण सहितान् करोतु, अस्माकम् आयूंसि च प्रवर्धयतु। हे वरुण! अस्माकम् उत्तमं शिरोगतं पाशम् उत्कृष्य मोचय, मध्यमम् उदरगतं पाशं वियुज्य नाशय, मे जीवितुं मदीयान् अधमानि पादगतान् पाशान् अवकृष्य नाशय इति।

**यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतम्।**
**मिनीमसि द्यविद्यवि॥1॥**
**मा नो वधाय हत्नवे जिहीळानस्य रीरध:।**
**मा हृणानस्य मन्यवे॥2॥**
**विमृळीकाय ते मनो रथीरश्वं न संदितम्।**
**गीर्भिर्वरुण सीमहि॥3॥**
**परा हि मे विमन्यव: पतन्ति वस्य इष्टये।**
**वयो न वसतीरुप॥4॥**
**कदा क्षत्रश्रियं नरमा वरुणं करामहे।**
**मृळीकायोरुचक्षसम्॥5॥**
**तदित्समानमाशाते वेनन्ता न प्र युच्छत:।**
**धृतव्रताय दाशुषे॥6॥**
**वेदा यो वीनां पदमन्तरिक्षेण पतताम्।**
**वेद नाव: समुद्रिय:॥7॥**
**वेद मासो धृतव्रतो द्वादश प्रजावत:।**
**वेदा य उपजायते॥8॥**
**वेद वातस्य वर्तनिमुरोर्ऋष्वस्य बृहत:।**
**वेदा ये अध्यासते॥9॥**
**निषसाद धृतव्रतो वरुण: पस्त्या३स्वा।**
**साम्राज्याय सुक्रतु:॥10॥**
**अतोविश्वान्यद्भुता चिकित्वाँ अभि पश्यति।**
**कृतानि या च कर्त्वा॥11॥**
**स नो विश्वाहा सुक्रतुरादित्य: सुपथा करत्।**
**प्र ण आयूंषि तारिषत्॥12॥**
**बिभ्रद्द्रापिं हिरण्ययं वरुणो वस्तनिर्णिजम्।**
**परि स्पशो नि षेदिरे॥13॥**
**न यं दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानाम्।**
**न देवमभिमातय:॥14॥**
**उत यो मानुषेष्वा यशश्चक्रे असाम्या।**
**अस्माकमुदरेष्वा॥15॥**
**परा मे यन्ति धीतयो गावो गव्यूतीरनु।**
**इच्छन्तीरुरुचक्षसम्॥16॥**
**सं नु वोचावहै पुनर्यतो मे मध्वाभृतम्।**
**होतेव क्षदसे प्रियम्॥17॥**
**दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि।**
**एता जुषत मे गिर:॥18॥**
**इमं मे वरुण श्रुधी हवमद्या च मृळय।**
**त्वामवस्युरा चके॥19॥**
**त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि।**
**स यामनि प्रति श्रुधि॥20॥**
**उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत।**
**अवाधमानि जीवसे॥21॥**

ऋग्वेद-संहिताया: प्रथम-ममण्डलस्य वरुण-सूक्तस्य मन्त्रेऽस्मिन् ऋषि: शुन:शेप: वरुणस्य प्रसादाय स्तुतिं कुर्वन् आह, हे वरुण! यथा लोकेऽस्मिन् प्रजा: कदाचित् प्रमादमपि कुर्वन्ति, तथैव स्वाभाविकरूपेण मानवस्वभावाद्वा अहमपि प्रमाद: कर्तुं शक्नोमि। अत: तं प्रमादम् अभिलक्ष्य माम् मा दण्डयतु। मेऽपराधम् क्षम्यताम् इत्यभिप्राय:।

हे वरुण! जिहीळानस्य अनादरं कृतवत: हत्नवे हन्तु: हनन-शीलस्य तव सम्बन्धिने त्वत्कर्तृकाय वधाय अस्मान् मा रीरध: संसिद्धान् विषय-भूतान् मा कुरु। हृणीयमानस्य तव मन्यवे क्रोधाय मा अस्मान् रीरध:।

ऋषि: शुन:शेप: वरुणस्य स्तुतिं कुर्वन् आह, हे वरुण! मृळीकाय अस्मत्सुखाय तव मन: स्तुतिभि: विशेषेण प्रसादयाम:। यथा रथी: रथ-स्वामी सम्यक् खण्डितं दूर-गमनेन श्रान्तम् अश्वं घास-प्रदानादिना प्रसादयति, तद्वत् अहमपि भवन्तम् प्रसादयामि, इत्यभिप्राय:।

शुन:शेप: जीवन-प्राप्त्यर्थं वरुणस्य स्तुतिं कुर्वन् आह, हे वरुण! यथा पक्षिण: अतीव आतुरतां प्रदर्शयन् स्वकीयं निवासस्थानं प्रति गच्छन्ति, तथैव मम शुन:शेपस्य क्रोध-रहिता बुद्धय: जीवनप्राप्त्यर्थम् अतिशयेन पुनरावृत्तिरहिता: तवाभिमुखं प्रसरन्ति।

अन्तरिक्षेण पतताम् आकाशमार्गेण गच्छतां वीनां पक्षिणां पदं निवासस्थानं य: वरुण: वेद तथा समुद्रिय: समुद्रे अवस्थित: य:

वरुण: नाव: जले गच्छन्त्या: पदं जानाति, सोऽस्मान् बन्धनान् मोचयतु इत्यभिप्राय:।

विस्तीर्णस्य दर्शनीयस्य बृहत: गुणैरधिकस्य वातस्य वायो: मार्गं य: वरुण: जानाति। ये देवा: अध्यासते उपरि तिष्ठन्ति, तान् अपि य: वरुण: वेद, सोऽस्मान् बन्धनान् मोचयतु इत्यर्थ:।

सुक्रतु: शोभनप्रज्ञ: स: अदिते: पुत्र: आदित्य: वरुण: सर्वेषु अहसु अस्मान् सुपथा शोभनमार्गेण सहितान् करोतु। किंच अस्माकम् आयूंषि प्रवर्धयतु।

दिप्सव: हिंसितुमिच्छन्तो ये वैरिण:, वरुणं न दिप्सन्ति भीता: सन्तो हिंसितुमिच्छां परित्यजन्ति। जनानां प्राणिनां द्रुह्वाण: द्रोग्धारोऽपि यं वरुणं प्रति न द्रुह्यन्ति, यथा यं वरुणं पाप्मान: न स्पृशन्ति, स वरुण: अस्मान् बन्धनान् मोचयतु इत्यभिप्राय:।

वरुणस्य स्तुतिं कुर्वन् ऋषि: शुन:शेप: आह, मे शुन:शेपस्य धीतय: बुद्धय: उरुचक्षसम् वरुणं इच्छन्ती निवृत्तिरहिता: गच्छन्ति, यथा गाव: गोष्ठानि अनुलक्ष्य गच्छन्ति, तद्वत् मे स्तुतिरपि इत्यभिप्राय:।

ऋषि: शुन:शेप: आह, हे वरुण! मदीयम् इमम् आह्वानम् भृणु। किं च अद्य अस्मान् सुखय। अवस्यु: रक्षणेच्छु: अहं त्वां वरुणम् आभिमुख्येन स्तौमि, इत्यर्थ:।

सूक्तस्यास्य अन्तिमे मन्त्रेऽस्मिन् ऋषि: शुन:शेप: पाश-मुक्त्यर्थं वरुणस्य महती कृपाम् इच्छन् स्तौति, हे वरुण! अस्माकम् उत्तमं शिरोगतं पाशम् उत्कृष्य मोचय, मध्यमम् उदरगतं पाशं वियुज्य नाशय, मे प्राणहेतवे मदीयान् पादगतान् पाशान् अवकृष्य नाशय। अर्थात् अस्मान् सकलान् बन्धनान् मोचय इत्यर्थ:।

## 7.3. सूर्यसूक्तम् (ऋक्. 1.125)

ऋग्वेदस्य प्रथम-मण्डलस्य सूर्यसूक्तस्यास्य सूर्य: देवता, कुत्स: ऋषि:, त्रिष्टुप्-छन्द:। सूक्तेऽस्मिन् ऋषि: भगवत: सूर्यस्य स्तुतिं कुर्वन् आह, जगतां चक्षुरिन्द्रियस्थानीय: सूर्य: उदयं प्राप्य दिवं पृथिवीम् अन्तरिक्षं च स्वकीयेन तेजसा समन्तात् अपूरयत्। ईदृग्भूत-मण्डलान्तर्वर्ती सूर्य: अन्तर्यामितया सर्वस्य प्रेरक: परमात्मा एव अस्ति। स हि सर्वस्य स्थावरजंगमात्मकस्य कार्यवर्गस्य कारणम्। उदिते हि सूर्ये मृतप्रायं जगत्सर्वं पुनश्चेतनयुक्तं सदुपलभ्यते। सूर्य: एव दानादिगुणयुक्तां दीप्यमानाम् उषसम् अभ्येति। अर्थात् उषस: प्रादुर्भावानान्तरं तामभिलक्ष्य गच्छति। यथा कश्चिन्मनुष्य: लावण्यमयीं गच्छन्तीम् युवतिं सततमनुगच्छति, तद्वत्। एवं विधं सूर्यं प्रति भद्राय कल्याणरूपाय कर्मफलाय स्तुम: इत्यभिप्राय:। इत्थम् अस्माभि: नमस्यमान: सूर्य: अन्तरिक्षस्य पृष्ठम् उपरिप्रदेशं पूर्वभागलक्षणम् प्राप्नोति। यद्वा, रसहरणशीला: सूर्यस्य रश्मय: भद्रादिलक्षणविशिष्टा: दिव: पृष्ठम् नभ:स्थलम् आतिष्ठन्ति। उदयसमये मित्रस्य वरुणस्य एतद्लक्षितस्य सर्वस्य जगत: आभिमुख्येन प्रकाशनाय नभस: उपस्थाने मध्ये सूर्य: सर्वस्य प्रेरक: सवितारूपं सर्वस्य निरूपकं प्रकाशकं तेज: करोति। अपि च अस्य सूर्यस्य रसहरणशीला: रश्मय: हरिद्वर्णा: अश्वा: वा अनन्तम् अवसानरहितं कृत्स्नस्य जगत: व्यापकं दीप्यमानं श्वेतवर्णं बलयुक्तं नैशस्य तमसो निवारणे समर्थम् अन्यत् तमसो विलक्षणं तेज: सम्भरन्ति स्वकीयागमनेन निष्पादयन्ति। एतत् सर्वम् सूर्यस्य माहात्म्यम्। हे सूर्यरश्मय: अद्य अस्मिन् काले सूर्यस्य उदये सति इतस्तत: प्रसरन्तो यूयम् अस्मान् अंहस: पापात् निष्कृष्य पालयत।

**चित्रं देवानामुदगाननीकं,**
**चक्षुर्मित्रस्य वरुणस्याग्ने:।**
**आप्रा द्यावापृथिवी अन्तरिक्षं,**
**सूर्य आत्मा जगतस्तस्थुषश्च॥1॥**

दीव्यन्तीति देवा: रश्मय:, तेषाम् देवानाम्, समूहरूपं आश्चर्यकरम् सूर्यस्य मण्डलम् उदयाचलं प्राप्तम् आसीत्। मित्रस्य वरुणस्य अग्ने: अथवा तदुपलक्षितानां जगतां प्रकाशकं चक्षुरिन्द्रियस्थानीयम् उदयं प्राप्य दिवम् पृथिवीम् अन्तरिक्षं च स्वकीयेन तेजसा समन्तात् अपूरयत्। ईदृग्भूत-मण्डलान्तवर्ती सूर्य: अन्तर्यामितया सर्वस्य प्रेरक: साक्षात् परमात्मा एव। स हि सूर्य: स्थावरजंगमात्मकस्य कार्यवर्गस्य कारणम्, स्थावरजंगमात्मकस्य सर्वस्य प्राणिजातस्य जीवात्मा एवाऽस्ति। उदिते हि सूर्ये मृतप्रायं सर्व जगत् पुनश्चेतनयुक्तं सदुपलभ्यते।

**सूर्यो देवीमुषसं रोचमानां,**
**मयो न योषामभ्येति पश्चात्।**
**यत्रा नरो देवयन्तो युगानि,**
**वितन्वते प्रति भद्राय भद्रम्॥2॥**

मन्त्रेऽस्मिन् ऋषि: कुत्स: आह, सूर्य: दानादिगुणयुक्तां दीप्यमानाम् उषसं पश्चात् अभ्येति, अर्थात् उषस: प्रादुर्भावनन्तरं तामभिलक्ष्य गच्छति। यथा कश्चित् मनुष्य: शोभनावयवां गच्छन्तीं युवतिं सततम् अनुगच्छति। एवंविधं कल्याणं सूर्यं प्रति कल्याणरूपाय कर्मफलाय स्तुम:।

**भद्रा अश्वा हरित: सूर्यस्य,**
**चित्रा एतग्वा अनुमाद्यास:।**
**नमस्यन्तो दिव आ पृष्ठमस्थु:,**
**परिद्यावापृथिवी यन्ति सद्य:॥3॥**

अश्वा: तुरगा: व्यापनशीला: वा हरित: चित्रा: विचित्रावयवा: अनुमाद्यास: अनुक्रमेण सर्वे स्तुत्या मादनीया एवं भूता: सूर्यस्य अश्वा:। एतं गन्तव्यं मार्गं गन्तारोऽश्वा:। नमस्यन्त: अस्माभि: नमस्यमाना: सन्त: दिव: अन्तरिक्षस्य पृष्ठम् उपरिप्रदेशं पूर्वभागलक्षणम् आ अस्थु: आतिष्ठन्ति प्राप्नुवन्ति वा। हरित: रसहरणशीला: रश्मय: भद्रादिलक्षण-विशिष्टा दिव: पृष्ठं नभस्थलम् आतिष्ठन्ति।

**तत्सूर्यस्य देवत्वं तन्महित्वं,**
**मध्या कर्तोर्विततं सं जभार।**
**यदेदयुक्त हरितः सधस्था,-**
**दाद्रात्री वासस्तनुते सिमस्मै॥4॥**

सूर्यस्य सर्वप्रेरकस्य आदित्यस्य तत् देवत्वम्, स्वातन्त्र्यमिति। महित्वं महत्वं माहात्म्यं च तत् एव। प्रारब्धापरिसमाप्तस्य कृष्यादिलक्षणस्य कर्मणः मध्या मध्ये अपरिसमाप्ते एव तस्मिन् कर्मणि विततं विस्तीर्णं स्वकीयं रश्मिजालम् अस्तं गच्छन् सूर्यः संजभार अस्माल्लोकात् स्वात्मन्युपसंहराति। ईदृशं स्वातन्त्र्यं महिमा च सूर्यव्यतिरिक्तस्य अन्यस्य तु नास्त्येव। सूर्य एव ईदृशं स्वातन्त्र्यं महिमानं च अवगाहते। यदेत् यस्मिन्नेव काले हरितः रसहरणशीलान् स्वरश्मीन् हरिद्वर्णान् अश्वान् वा सधस्थात् सहस्थानात् अस्मात् पार्थिवाल्लोकादादाय अयुक्त अन्यत्र संयुक्तान् करोति। अनन्तरमेव रात्री निशा वासः आच्छादयितृ तमः सिमस्मै। अत्र सिमशब्दः सर्वशब्दपर्यायः। सर्वस्मिन् लोके तनुते विस्तारयति। अर्थात् अस्माल्लोकाद् वासरम् अपनीय रात्री तमस्तनुते इत्यभिप्रायः।

**तन्मित्रस्य वरुणस्याभिचक्षे,**
**सूर्यो रूपं कृणुते द्योरुपस्थे।**
**अनन्तमन्यद्रुशदस्य पाजः,**
**कृष्णमन्यद्धरितः सं भरन्ति॥5॥**

तत् तदानीम् उदयसमये मित्रस्य वरुणस्य एतदुभयोप-लक्षितस्य सर्वस्य जगतः अभिचक्षे आभिमुख्येन प्रकाशनाय द्यौः नभसः उपस्थे उपस्थाने मध्ये सूर्यः सर्वस्य प्रेरकः सविता रूपं सर्वस्य निरूपकं प्रकाशकं तेजः कुणुते। अपि च अस्य सूर्यस्य हरितः रसहरणशीला रश्मयः हरिद्वर्णा अश्वा वा अनन्तम् अवसानरहितं कृत्स्नस्य जगतो व्यापकं रुशत् दीप्यमानं श्वेतवर्णं बलयुक्तं नैशस्य तमसो निवारणे समर्थम् अन्यत् तमसो विलक्षणं तेजः संभरन्ति अहनि स्वकीयागमनेन निष्पादयन्ति।

**अद्या देवा उदिता सूर्यस्य,**
**निरंहसः पिपृता निरवद्यात्।**
**तन्नो मित्रो वरुणो मामहन्ता,-**
**मदितिः सिन्धुः पृथिवी उत द्यौ॥6॥**

हे देवाः द्योतमानाः सूर्यरश्मयः अद्य अस्मिन्काले सूर्यस्य आदित्यस्य उदिता उदितौ उदये सति इतस्ततः प्रसरन्तो यूयम् अस्मान् अंहसः पापात् निःपिपृत निष्कृष्य पालयत। यदिदम् अस्माभिरुक्तं नः अस्मदीयं तत् मित्रः वरुणः, अदितिः, सिन्धुः, पृथिवी, द्यौश्च षड्देवताः ममहन्तां पूजयन्तु अनुमन्यन्ताम्। अत्र मित्रः प्रमीतेस्त्रायकः अहरभिमानी देवः,

वरुणः अनिष्टानां निवारयिता रात्र्यभिमानी देवः, अदितिः अखण्डनीया अदीना वा देवमाता, सिन्धुः स्यन्दनशीला उदकाभिमानिनी देवता, पृथिवी भूलोकस्याधिष्ठात्री देवता, द्यौः द्युलोकस्य अभिमानी देवः।

## 7.4. इन्द्रसूक्तम् (ऋक्. 2.12)

द्वितीयमण्डलस्य 'यो जात' इति पञ्चदशर्चमयं द्वादशतमं सूक्तं गार्त्समदं त्रैष्टुभमैन्द्रम्। अत्रेतिहासो बृहद्देवतायाम् उक्तः—

**संयुज्य तपसात्मानमैन्द्रं बिभ्रन्महद्वपुः।**
**अदृश्यत मुहूर्तेन दिवि च व्योम्नि चेह च॥66॥**
**तमिन्द्र इति मत्वा तु दैत्यो भीमपराक्रमौ।**
**धुनिश्च चुमुरिश्चोभौ सायुधावभिपेततुः॥67॥**
**विदित्वा स तयोर्भावमृषिः पापं चिकीर्षतोः।**
**यो जात इति सूक्तेन कर्माण्यैन्द्राण्यकीर्तयत॥68॥**
**—बृहद्देवता॥4/66-68॥**

अन्ये त्वन्यथा वर्णयन्ति। पुरा किल इन्द्रादयो वैन्ययज्ञं समाजग्मुः। गृत्समदोऽपि तत्रागत्य सदस्यासीत्। दैत्याश्चेन्द्र-जिघांसया तत्र समागमन्! तान् दृष्ट्वा निर्जगाम इन्द्रो यज्ञात् गृत्समदाकृतिः। स च गृत्समदो वैन्येन पूजितो यज्ञवाटात् निरगच्छत्। निर्गच्छन्तं तमृषिं दृष्ट्वा अयमेवेन्द्रः इति मन्यमानास्तमसुराः परिवव्रुः। नाहमिन्द्रस्तुच्छः किन्त्वेवं-गुणोपेतः स इत्यनेन सूक्तेन तान् प्रत्युवाच अयमेवार्थो महाभारते प्रपंचितः।

अपरे त्वेवं कथयन्ति गृत्समदस्य प्रविष्टम् एकाकिनम् इन्द्रं ज्ञात्वा असुराः परिवव्रुः। स इन्द्रो गृत्समदरूपेण यज्ञवाटात् निर्गत्य स्वर्गं जगाम। ततोऽसुरा इन्द्रो विलम्बितः इत्यन्तः प्रविश्य गृत्समद्रूपेणास्ते तं जगृहुः। इति स तान् नाहम् इन्द्रोऽयमित्यनेन सूक्तेन प्रत्युवाच। अयमेवार्थो महाभारते प्रपंचितः।।

'यो जात' इति पञ्चदश-मन्त्रात्मकस्य सूक्तस्य ऋषिः गृत्समदः। इन्द्रो देवता। त्रिष्टुप् छन्दः। गृत्समदो ब्रूते, हे जनासः! यः मनस्वान् देवः जायमान एव स्वकीयेन कर्मणा सर्वान् देवान् पर्यभूषत्, यः चलन्तीं पृथिवीम् अदृंहत्, यः इतस्ततश्चलितान् पक्षयुक्तान् पर्वतान् अरम्णात् नियमितवान्, यः अहिं हत्वा सर्पणशीलाः सप्त-सिन्धून् अरिणात्, यः अश्मनोः अन्तः अग्निं जजान, स इन्द्रः नाहमस्मि। येन इमा विश्वा च्यवना कृतानि, यश्च दासं वर्णम् शूद्रादिकम् अधरं गुहायाम् अकार्षीत्, यः रध्रस्य धनानां प्रेरयिता अस्ति, यः सूर्यम् उषसं च जजान, यः अपां नेता चास्ति। यस्माद् ऋते जनासः न विजयन्ते; अतः युद्ध्यमानाः जनाः स्वरक्षणाय यम् इन्द्रं हवन्ते, सः अच्युतच्युत् इन्द्रः अस्ति, नाहमिन्द्र। हे जनासः! हे असुराः! यः महत् पापं दधानान् अमन्यमानान् जनान् शर्वा जघान, यः पर्वतेषु क्षियन्तं शम्बरासुरं चत्वारिंश्यां शरदि अन्विष्य अलभत, लब्ध्वा च हतवान् स एव इन्द्रः। यश्च वज्रबाहुः सन् द्याम् आरोहन्तं रौहिणम् असुरं जघान, सप्त-सिन्धून् च सरणाय अवासृजत्। यस्मै इन्द्राय द्यावापृथिवी

चिद् नमेते, यस्य शुष्माच्च पर्वताः अपि भयन्ते, सोमः यस्य वृद्धिहेतुर्भवति, सः सोमपा, शुशिप्रः बज्रबाहुः एव इन्द्र अस्ति; हे जनासः! अहमिन्द्रः नास्मि, अहं तु ऋषिः गृत्समदः अस्मि।

**यो जात एव प्रथमो मनस्वान्,**
**देवो देवान् क्रतुना पर्यभूषत्।**
**यस्य शुष्माद् रोदसी अभ्यसेतां,**
**नृम्णस्य मह्ना स जनास इन्द्रः॥ 1॥**

इमं मन्त्रमाश्रित्य गृत्समदो ब्रूते, हे जनासः! हे असुराः! यो जात एव, जायमानः एव सन् प्रथमः देवानां प्रधानभूतः मनस्वान् मनस्विनाम् अग्रगण्यः देवः द्योतमानः सन् क्रतुना वृत्रवधादिलक्षणेन स्वकीयेन कर्मणा देवान् सर्वान् यागदेवान् पर्यभूषत् रक्षकत्वेन पर्यग्रहीत्। **'भूष अलंकारे'** भूवादिः, लङिरूपम्। सर्वानन्यान् देवान् पर्यभूषत् पर्यभवद् अत्याक्रमत्। यस्य इन्द्रस्य शुष्मात् शरीराद् बलाद् रोदसी द्यावापृथिव्यावभ्यसेतां विभीताम्। नृम्णस्य सेनालक्षणस्य बलस्य मह्ना महत्वेन युक्तः स इन्द्रो नाहमिति। अत्र निरुक्तम्,–''**यो जायमान एव प्रथमो मनस्वी देवो देवान् क्रतुना कर्मणा पर्यभवत् पर्यगृह्णात् पर्यरक्षद् अत्यक्रामदिति वा। यस्य बलाद् द्यावापृथिव्यावप्यविभीतां नृम्णस्य मह्ना बलस्य महत्वेन स इद्रः इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यान-संयुक्ता**'' (निरुक्तम् 10.1.4) इति।

**यः पृथिवीं व्यथमानामदृंहद्,**
**यः पर्वतान् प्रकुपिताँ अरम्णात्।**
**यो अन्तरिक्षं विममे वरीयो,**
**यो द्यामस्तभ्नात् इन्द्रः॥2॥**

भगवान वेदपुरुष आह यत् गृत्समदो ब्रूते–हे जनाः! यः इन्द्रः व्यथमानां चलन्तीं पृथिवीम् अदृंहत् शर्करादिभिर्दृढाम् अकरोत्। 'दृह दृहि (बृह बृहि) वृद्धौ'। यश्च प्रकुपितान् इतस्ततः चलितान् पक्षयुक्तान् पर्वतान् अरम्णात् नियमितवान् स्वे स्वे स्थाने स्थापितवान्, अरम्णात्, **'रमु क्रीडायाम्'** अन्तर्भावितण्यर्थस्य व्यत्ययेन श्नाप्रत्ययः। यश्च वरीयः उरुतममन्तरिक्षं विममे निर्ममे विस्तीर्णं चकार इत्यर्थः। यश्च द्यां दिवमस्तभ्नात् तस्तम्भः निरुद्धामकरोत्। **स्तम्भु रोधने** इति सौत्रो धातुः स एव इन्द्रः नाहमिति।

**यो हत्वाहिमरिणात्सप्तसिन्धून्,**
**यो गा उदाजदपधा वलस्य।**
**यो अश्मनोरन्तरग्निं जजान,**
**संवृक्समत्सु स जनास इन्द्रः॥3॥**

इन्द्रस्य पराक्रमं प्रदर्शयन् गृत्समदो ब्रूते, यो हत्वाहिमिति। योऽहिं मेघं हत्वा मेघहननं कृत्वा सप्त-सर्पणशीलाः सिन्धून् स्यन्दनशीलाः अपोऽरिणात् प्रेरयत्। यद्वा सप्त गंगायमुनाद्या मुख्या नदीररिणात्। **'रीङ् स्रवणे'** क्र्यादिः। यश्च वलस्य वल-नामकस्य असुरस्य अपधा तत्कर्तृकान् निरोधान् निरुद्धाः गा उदाजत् निरगमयत्। अपधा अपपूर्वाद्दधातेः **'आतश्चोपसर्गे'** (पा.सू. 3.3.106) इति भावे 'अङ्'प्रत्ययः। 'सुपां सुलुक्' (पा.सू. 7.1.39) इति पञ्चम्या आकारः। यश्च अश्मनोः। अश्नुते व्याप्नोत्यन्तरिक्षम् इत्यश्मा मेघः। अत्यन्त-मृदु-रूपयोः मेघयोरन्तर्मध्ये वैद्युतमग्निं जजानोत्पादयामास। पश्य समत्सु सम्भक्षयन्ति योद्धृणाम् आयूंषि, इति समदः संग्रामाः। तेषु संवृक् भवति। वृणक्तेः हिंसार्थस्य क्विपि रूपम्।

**येनेमा विश्वा च्यवना कृतानि,**
**यो दासं वर्णमधरं गुहाकः।**
**श्वघ्नीव यो जिगीवां लक्षमादद्,**
**अर्यः पुष्टानि स जनास इन्द्रः॥4॥**

गृत्समदो ब्रूते, हे जनासः! येन इन्द्रेण इमा इमानि विश्वा च्यवना नश्वराणि भुवनानि कृतानि स्थिरीकृतानि। यश्च दासं वर्णं शूद्रादिकं यद्वा दासमुपक्षपयितारम्। अधरं निकृष्टमसुरं गुहा गुहायां गूढस्थाने नरके वा अकः अकार्षीत्। करोतेर्लुङि 'मन्त्रे घस' इत्यादिना च्लेर्लुकि रूपम्। लक्षं लक्ष्यं जिगीवान्। 'जि जये' क्वसौ 'सन् लिटोर्जेः' इति अभ्यासादुत्तरस्य कुत्वम्। दीर्घश्छान्दसः। जितवान्। यः अर्यः अरेः, शत्रोः सम्बन्धीनि पुष्टानि समृद्धानि आदत् आदते। तत्र दृष्टान्तः। श्वघ्नीव। श्वभिर्मृगान् हन्तीति श्वघ्नी व्याधः। यथा व्याधो जिघृक्षितं मृगं परिगृह्णाति तद्वत्।

**यं स्मा पृच्छन्ति कुह सेति घोर-,**
**मुतेमाहुर्नैषो अस्तीत्येनम्।**
**सो अर्यः पुष्टीर्विज इवा मिनाति,**
**श्रदस्मै धत्त स जनास इन्द्रः॥5॥**

गृत्समदो ब्रूते यमिति। अपश्यन्तो जनाः घोरं शत्रूणां घातकं यं पृच्छन्ति स्म कुह सेति। स इन्द्रः कुत्र वर्तते इति। सेति, **'सोऽचि लोपे चेत्पादपूरणम्'** इति सोर्लोपे गुणः। न क्वचिदसौ तिष्ठतीति मन्यमानाः एनम् इन्द्रम् आहुः, एष इन्द्रः नास्तीति। तथा च मन्त्रः ''**नेन्द्रो अस्तीति नेम उ त्व आह**'' (ऋग्वेद 8.100.3) इति। ईम् इति पूरणः। सः इन्द्रः विज इव। इव-शब्द एवार्थे उद्वेजक एव सन्। अर्यः अरेः सम्बन्धीनि पुष्टीः पोषकाणि गवाश्वादीनि धनानि आ मिनाति सर्वतो हिनस्ति। **'मीङ् हिंसायम्'** '**'मीनातेर्निगमे'** इति ह्रस्वः। तस्मात् श्रदस्मै इन्द्राय धत्त। स इन्द्रोऽस्तीति विश्वासमत्र कुरुत। यद्यप्यसौ विशेषतोऽस्माभिर्न दृश्यते, तथापि अस्तीति विश्वासं कुरुत। एवं निर्धारणीय-महिमोपेतः सः इन्द्रः, नाहमिति।

**यो रध्रस्य चोदिता यः कृशस्य,**
**यो ब्रह्मणो नाधमानस्य कीरेः।**
**युक्तग्राव्णो योऽविता सुशिप्रः,**
**सुतसोमस्य स जनास इन्द्रः॥6॥**

गृत्समदो ब्रूते यो रध्रस्येति। 'रध् हिंसासंराद्धयोः'। समृद्धस्य चोदिता धनानां प्रेरयिता भवति। यश्च कृशस्य दरिद्रस्य च यश्च नाधमानस्य। याचमानस्य कीरेः। करोतेः कीर्तयतेर्वा। स्तोतुः ब्रह्मणः धनानां प्रेरयिता। यश्च सुशिप्रः शोभनहनुः सुशीर्षको वा सन् युक्तग्राव्णः अभिषवार्थम् उद्यतग्राव्णः सुतसोमस्य अभिषुत सोमस्य यजमानस्य अविता भवति स एव इन्द्रः नाहमिति।

**यस्याश्वासः प्रदिशि यस्य गावो,**
**यस्य ग्रामा यस्य विश्वे रथासः।**
**यः सूर्यं य उषसं जजान,**
**यो अपां नेता स जनास इन्द्रः ॥7॥**

गृत्समदो ब्रूते, यस्य सर्वान्तर्यामितया वर्तमानस्य प्रदिशि प्रदेशनेऽनुशासने अश्वासः अश्वाः वर्तन्ते। यस्य अनुशासने गावः। यस्य अनुशासने ग्रामाः ग्रसन्तेऽत्रेति ग्रामाः जनपदाः। यस्य आज्ञायां विश्वे सर्वे रथासः रथा वर्तन्ते। यश्च वृत्रं हत्वा सूर्यं जजान जनयामास। यश्च उषसम्। तथा मन्त्रः,–"**जजान सूर्यमुषसं सुदंशाः**" (ऋक् 3/32/8) इति। यश्च मेघ-भेदनद्वारापां नेता प्रेरकः, स इन्द्रः, नाहमिति।

**यं क्रन्दसी संयती विह्वयेते,**
**परेऽवर उभया अमित्राः।**
**समानं चिद्रथमातस्थिवांसा,**
**नाना हवेते स जनास इन्द्रः ॥8॥**

गृत्समदो ब्रूते, यं क्रन्दसी रोदसी शब्दं कुर्वाणे, मानुषी दैवी च द्वे सेने वा संयती परस्परं संगच्छंत्यौ यम् इन्द्रं विह्वयेते स्वरक्षार्थं विविधमाह्वयतः। परे उत्कृष्टः अवरे अधमाश्च। उभयाः उभयविधाः। अमित्राः शत्रवः यम् आह्वयन्ति। समानम् इन्द्र-रथसदृशं रथम् आतस्थिवांसा आस्थितौ द्वौ रथिनौ तमेवेन्द्रं नाना पृथक-पृथक् हवेते आह्वयेते। यद्वा समानमेकरथ-मारूढाविन्द्राग्नी हवेते यज्ञार्थ यजमानैः पृथगाहूयेते तयोरन्यतरः सः इन्द्रः, नाहमिति।

**यस्मान्न ऋते विजयन्ते जनासो,**
**यं युध्यमाना अवसे हवन्ते।**
**यो विश्वस्य प्रतिमानं बभूव,**
**यो अच्युतच्युत् स जनास इन्द्रः ॥9॥**

गृत्समदो ब्रूते, हे असुराः! यस्माद् ऋते जनासः जनाः न विजयन्ते, विजयं न प्राप्नुवन्ति। अतः युद्ध्यमानाः युद्धं कुर्वाणाः जनाः अवसे स्वरक्षणाय यम् इन्द्रं हवन्ते आह्वयन्ति। यश्च विश्वस्य सर्वस्य जगतः प्रतिमानं प्रतिनिधिः बभूव। यश्च अच्युतच्युत् अच्युतानां क्षय-रहितानां पर्वतादीनां च्यवयिता स इन्द्रः अस्ति, अहमिन्द्रः नास्मि। अहं तु गृत्समदो नाम ऋषिः अस्मि।

**यः शश्वतो मह्येनो दधाना-**
**नमन्यमानाञ्छर्वा जघान।**
**यः शर्धते नानुददाति शृध्यां,**
**यो दस्योर्हन्ता स जनास इन्द्रः ॥10॥**

गृत्समदो ब्रूते, यः महि महत् एनः पापं दधानान् शश्वतो बहूनमन्यमानान् आत्मानमजानत इन्द्रमपूजयतो वा जनान् शर्वा। शृणाति शत्रूननेनेति शरुर्वज्रः। तेन आयुधेन जघान। हन्तेर्लिटि रूपम्,यश्च शर्धते उत्साहं कुर्वते अनात्मज्ञाय जनाय शृध्याम् उत्साहनीयं कर्म नानुददाति न प्रयच्छति। अनुपूर्वात् 'डुदाञ् दाने' जौहोत्यादिकः '**अभ्यस्तानामादिः**' इति। '**तिङि चोदात्तवति**' (पा.सू. 8.1.71) इति गतेर्निघातः। यश्च दस्योः उपक्षपयितुः शत्रोः हन्ता घातकः इन्द्रः सः, नाहमिति।

**यः शम्बरं पर्वतेषु क्षियन्तं,**
**चत्वारिंश्यां शरद्यन्वविन्दत्।**
**ओजायमानं यो अहिं जघान,**
**दानुं शयानं स जनास इन्द्रः ॥11॥**

गृत्समदो ब्रूते, यः पर्वतेषु क्षियन्तम् इन्द्रभिया बहून् संवत्सरान् प्रच्छन्नो भूत्वा पर्वतगुहासु निवसन्तं शम्बरम् एतन्नामकं मायाविनमसुरं चत्वारिंश्यां शरदि चत्वारिंशे संवत्सरे अन्वविन्दत् अन्विष्यालभत्। लब्ध्वा च यः ओजाययमानं '**कर्तुः क्यङ्सलोपश्च**'। '**ओजसोऽप्सरसो नित्यम्**' इति सकारलोपः। बलमाचरन्तम् अहिम् आहन्तारं दानुं दानवं शयानं शम्बरासुरं जघान हतवान् स इन्द्रः, नाहमिति। अहं तु गृत्समदः अस्मि।

**यः सप्तरश्मिर्वृषभस्तुविष्मा-**
**नवासृजत्सर्तवे सप्तसिन्धून्।**
**यो रौहिणमस्फुरद्वज्रबाहु-**
**र्द्यामारोहन्तं स जनास इन्द्रः ॥12॥**

गृत्समदो ब्रूते, यः सप्तरश्मिः सप्त संख्यकाः पर्जन्याः रश्मयो यस्य। ते च रश्मयो "**बराहवः स्वतपसो विद्युन्महसो धूपयः श्वापयो गृहमेधाश्च इत्येते ये च इमेऽशिमिविद्विषः पर्जन्याः सप्त पृथिवीमभिवर्षन्ति वृष्टिभिः**" (तै. आ.1.9.4–5) इति तैत्तिरीयारण्यके ह्याम्नाताः। वृषभः बर्षकः तुविष्मान वृद्धिमान् बलवान् वा सप्त सर्पणस्वभावान् सिन्धून् अपः सर्तवे सरणाय अवासृजत् अवसृष्टवान्। यद्वा गंगाद्याः सप्त मुख्या नदीरसृजत्। यश्च बज्रबाहुः सन् द्यां दिवम् आरोहन्तं रौहिणम् असुरम् अस्फुरत् जघान। 'स्फुर स्फुरणे' तुदादिः।

**द्यावा चिदस्मै पृथिवी नमेते,**
**शुष्माच्चिदस्य पर्वता भयन्ते।**
**यः सोमपा निचितो बज्रबाहु-**
**र्यो बज्रहस्तः स जनास इन्द्रः ॥13॥**

गृत्समदो ब्रूते, अस्मै इन्द्राय द्यावापृथिवी। इतरेतरापेक्षया द्विवचनं "**प्रमित्रयोर्वरुणयोः**" (ऋक् 7.66.1) इतिवत्। नमेते स्वयमेव प्रह्वीभवतः। '**णमु प्रह्वत्वे**'। कर्मकर्तरि न **दुहस्नुनमां यक्चिणौ** (पा. सू. 3.1.89) इति यकः प्रति-षेधः। चिद् अपि च अस्य इन्द्रस्य शुष्मात् बलात् पर्वताः भयन्ते बिभ्यति। यः सोमपाः

सोमस्य पाता निचितः सर्वः। यद्वा अन्येभ्योऽपि देवेभ्यो दृढाङ्गः। वज्रबाहुः बज्रसदृशबाहुः। यश्च वज्रहस्तो वज्रयुक्तः स इन्द्रः नाहमिति।

**यः सुन्वन्तमवति यः पचन्तं,**
**यः शंसन्तं यः शशमानमूती।**
**यस्य ब्रह्म वर्धनं यस्य सोमो,**
**यस्येदं राधः स जनास इन्द्रः ॥14॥**

ऋषि गृत्समदः ब्रूते, हे असुरा जनाः। यः सुन्वन्तं सोमाभिषवं कुर्वन्तं यजमानम् अवति रक्षति। यश्च पुरोडाशादीनि हवींषि पचन्तं यश्च ऊती ऊतये। '**सुपां सुलुक्**' (पा. सू. 7.1.39) इति चतुर्थ्याः पूर्वसवर्णदीर्घः। स्वरक्षायै शस्त्राणि शंसन्तं यश्च शशमानमवति स्तोत्रं कुर्वाणं रक्षति। ब्रह्मपरिवृढं स्तोत्रं यस्य वृद्धिकरं भवति तथा यस्य सोमः वृद्धिहेतुर्भवति। यस्य चेदम् अस्मदीयः राधः पुरोडाशादिलक्षणमन्नं वृद्धिकरं भवति। स इन्द्रः, नाहमिति।

**यः सुन्वते पचते दुध्र आ चि-**
**द्वाजं दर्दर्षि स किलासि सत्यः।**
**वयं त इन्द्र विश्वह प्रियासः,**
**सुवीरासो विदथमा वदेम ॥15॥**

भगवान् देवपुरुष आह यत् गृत्समदः साक्षात्कृतमिन्द्रं प्रति ब्रूते। हे इन्द्र! यः दुध्रः दुर्धरः सन् सुन्वते सोमाभिषवं कुर्वते। पुरोडाशादिहवींषि पचते यजमानाय वाजमन्नं बलं वा दर्दर्षि भृशं प्रापयसि सः तादृशस्त्वं सत्यः यथार्थभूतोऽसि न पुनर्नास्तीति बुद्धियोग्योऽसि। किलेति प्रसिद्धौ। ते तव प्रियासः सुवीरासः कल्याणपुत्रपौत्राः सन्तः वयं विश्वह सर्वेष्वहोरात्रिषु विदथं स्तोत्रं आवदेम ब्रूसाम। /

## 7.5. विश्वामित्र-नदी-संवाद-सूक्तम् (ऋग्वेद. 3.33)

**प्र पर्वतानामुशती उपस्थाद्,**
**अश्वे इव विषिते हासमाने।**
**गावेव शुभ्रे मातरा रिहाणे,**
**विपाट्छुतुद्री पयसा जवेते ॥1॥**
**इन्द्रेषिते प्रसवं भिक्षमाणे,**
**अच्छा समुद्रं रथ्येव याथः।**
**समाराणे ऊर्मिभिः पिन्वमाने,**
**अन्या वामन्यामप्येति शुभ्रे ॥2॥**
**अच्छा सिन्धुं मातृतमामयासं,**
**विपाशमुर्वी सुभगामगन्म।**
**वत्समिव मातरा संरिहाणे,**
**समानं योनिमनु संचरन्ती ॥3॥**
**एना वयं पयसा पिन्वमाना,**
**अनुयोनिं देवकृतं चरन्तीः।**
**न वर्तवे प्रसवः सर्गतक्तः,**
**किंयुर्विप्रो नद्यो जोहवीति ॥4॥**
**रमध्वं मे वचसे सोम्याय,**
**ऋतावरीरुप मुहूर्तमेवैः।**
**प्र सिन्धुमच्छा बृहती मनीषा-**
**वस्युरह्वे कुशिकस्य सूनुः ॥5॥**
**इन्द्रो अस्माँ अरदद्वज्रबाहुर-**
**पाहन्वृत्रं परिधिं नदीनाम्।**
**देवोऽनयत्सविता सुपाणि-**
**स्तस्य वयं प्रसवे याम उर्वीः ॥6॥**
**प्रवाच्यं शश्वधा वीर्यं तद्,**
**इन्द्रस्य कर्म यदहिं विवृश्चत्।**
**वि व्रजेण परिषदो जघाना-**
**यन्नापोऽयनमिच्छमानाः ॥7॥**
**एतद्वचो जरितर्मापि मृष्ठा,**
**आ यत्ते घोषानुत्तरा युगानि।**
**उक्थेषु कारो प्रति नो जुषस्व,**
**मा नो नि कः पुरुषत्रा नमस्ते ॥8॥**
**ओ षु स्वसारः कारवे शृणोत,**
**ययौ वो दूरादनसा रथेन।**
**नि षू नमध्वं भवता सुपारा,**
**अधो अक्षाः सिन्धवः स्रोत्याभिः ॥9॥**
**आ ते कारो शृणवामा वचांसि,**
**ययाथ दूरादनसा रथेन।**
**नि ते नंसै पीप्यानेव योषा,**
**मर्यायेव कन्या शश्वचै ते ॥10॥**
**यदङ्ग त्वा भरताः संतरेयु-**
**र्गव्यन्ग्राम इषित इन्द्रजूतः।**
**अर्षादह प्रसवः सर्गतक्त,**
**आ वो वृणे सुमतिं यज्ञियानाम् ॥11॥**
**अतारिषुर्भरता गव्यवः,**
**समभक्त विप्रः सुमतिं नदीनाम्।**
**प्र पिन्वध्वमिषयन्तीः सुराधा,**
**आ वक्षणाः पृणध्वं यात् शीभम् ॥12॥**
**उद्व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत।**
**मादुष्कृतौ व्येनसाघ्न्यौ शूनमारताम् ॥13॥**

## 7.6. उषस् सूक्तम् (ऋक्.3.61)

सूक्तस्यास्य उषा देवता, विश्वामित्रो ऋषिः, त्रिष्टुप्-छन्दश्च। ऋषिः उषसः स्तुतिं कुर्वन् आह, हे भगवति! त्वमेव वाजिनि, त्वमेव मघोनि, त्वमेव प्रकृष्टज्ञानवती, त्वमेव विश्ववारा, पुराणी, युवती च असि। हे दवि! त्वं मरणधर्म-रहिता, सुवर्णमयरथोपेता असि, एतादृशीं त्वां प्रभूतबलयुक्ताः अश्वाः आवहन्तु। हे भगवति! त्वमेव वस्त्रमिव तमः अवचिन्वती, स्वकीयं तेजः जनन्ती द्युलोकात् पृथ्विलोक-पर्यन्तं प्रथते प्रकाशते वा। इयमेव उषा नभसि तेजः श्रयति तथा स्वतेजसा लोकान् प्रकाशयति। इयम् ऋतावरी उषा द्युलोकात् तेजोभिः सर्वैः ज्ञायते। इयमेव धनवती द्युलोके पृथिवीलोके च विविधरूपैः आत्मानम् उपस्थापयति। दिनस्य प्रारम्भे उषसाम् प्रेरयन् अपां प्रेरकः आदित्यः स्वतेजोभिः द्यावापृथिव्यौ आविवेश। यद्वा, वृषा वर्षितेषण्यन् सर्वतो गच्छन् उषसां रश्मिसमूहो द्यावापृथिव्यौ विष्टवान्। ततः उषा मित्रावरुणयोः प्रभारूपा सती चन्द्रेव सुवर्णानीव स्वप्रभां सर्वत्र प्रसारयति।

**उषो वाजेन वाजिनि प्रचेताः,**
**स्तोमं जुषस्व गृणतो मघोनि।**
**पुराणी देवि युवतिः पुरंधि-**
**रनु व्रतं चरसि विश्ववारे॥1॥**
**उषो देव्यमर्त्या वि भाहि,**
**चन्द्ररथा सूनृता ईरयन्ती।**
**आ त्वा वहन्तु सुयमासो अश्वा,**
**हिरण्यवर्णां पृथुपाजसो ये॥2॥**
**उषः प्रतीची भुवनानि विश्वो-**
**र्ध्वा तिष्ठस्यमृतस्य केतुः।**
**समानमर्थं चरणीयमाना,**
**चक्रमिव नव्यस्या ववृत्स्व॥3॥**
**अव स्यूमेव चिन्वती मघो-**
**न्युषा याति स्वसरस्य पत्नी।**
**स्वर्जनन्ती सुभगा सुदंसा,**
**आन्ताद्दिवः पप्रथ आ पृथिव्याः॥4॥**
**अच्छा वो देवीमुषसं विभातीं,**
**प्र वो भरध्व नमसा सुवृक्तिम्।**
**ऊर्ध्वं मधुधा दिवि पाजो अश्रेत्**
**प्र रोचना रुरुचे रण्वसंदृक्॥5॥**
**ऋतावरी दिवो अर्कैरबोध्या,**
**रेवती रोदसी चित्रमस्थात्।**
**आयतीमग्न उषसं विभातीं,**
**वाममेषि द्रविणं भिक्षमाणः॥6॥**
**ऋतस्य बुध्न उषसामिषण्य,**
**न्वृषा मही रोदसी आ विवेश।**
**मही मित्रस्य वरुणस्य माया,**
**चन्द्रेव भानुं वि दधे पुरुत्रा॥7॥**

## 7.7. पर्जन्यसूक्तम् (ऋक्. 5.83)

सूक्तेऽस्मिन् ऋषिः अत्रिः आह, हे स्तोतः! बलवन्तं पर्जन्यं गीर्भिः स्तुहि। यः पर्जन्यः अपांवर्षिता क्षिप्रदानः गर्जनशब्दं कुर्वन्, ओषधीषु गर्भस्थानीयं रेतः उदकं दधाति स्थापयति वा तं स्तुहि। पर्जन्यो वृक्षान् विहन्ति, रक्षांसि विहन्ति च। यदा पर्जन्यः स्तनयन् दुष्कृतः पापकृतः हन्ति, तदा अनपराधोऽपि भीतः पलायते। अन्यच्च यदा पर्जन्यः अन्तरिक्षं वर्षोपेतं करोति, तदा सः कशया अश्वान् अभिक्षिपन् प्रभिप्रेरयन् वर्षकान् दूतान् मेघान् वा प्रकटयति। वृष्ट्यर्थं वाताः प्रवान्ति, विद्युतः समन्तात् संचरन्ति, ओषधयः प्रवर्धन्ते, स्वः अन्तरिक्षं पिन्वते, सर्वस्मै भुवनाय भूमिः अन्नम् उत्पादयति, यदा पर्जन्यः पृथिवीम् उदकेन अवति। यस्य पर्जन्यस्य कर्मणि पृथिवी नन्नमीति, यस्य व्रते पादोपेतं गवादिकं भ्रियते पूर्यते गच्छति वा, यस्य कर्मणि ओषधयः नानारूपा भवन्ति, हे पर्जन्यः! स महांस्त्वम् अस्मभ्यं महत् सुखं प्रयच्छ। इत्थं हे मरुतः! यूयं अन्तरिक्षसकाशात् अस्मदर्थं वृष्टिं दत्त। हे पर्जन्य! त्वं गर्जता मेघेन सह अस्मदभिमुखम् आगच्छ। हे पर्जन्य ! त्वं महान्तं प्रवृद्धं कोशस्थानीयं मेघम् उद्गमय, तथा कृत्वा निःषिञ्च च, येन नद्यः विष्यूताः सत्यः प्रवहन्तु। हे पर्जन्य! यदा त्वं स्तनयन् दुष्कृतः मेघान् विदारयसि, तदा विश्वमिदं मोदते, यतो हि वृष्टेः सर्वजगत्प्रीतिकारणत्वं प्रसिद्धम्-

**अच्छा वद तवसं गीर्भिराभिः,**
**स्तुहि पर्जन्यं नमसा विवास।**
**कनिक्रदद्वृषभो जीरदानू,**
**रेतो दधात्योषधीषु गर्भम्॥1॥**
**वि वृक्षान् हन्त्युत हन्ति रक्षसो,**
**विश्वं विभाय भुवनं महावधात्।**
**उतानागा ईषते वृष्ण्यावतो,**
**यत्पर्जन्यः स्तनयन् हन्ति दुष्कृतः॥2॥**
**रथीव कशयाश्वां अभिक्षिप-**
**न्नाविर्दूतान्कृणुते वर्ष्यां३अह।**
**दूरात्सिंहस्य स्तनथा उदीरते,**
**यत्पर्जन्यः कृणुते वर्ष्यं१नभः॥3॥**
**प्रवाता वान्ति पतयन्ति विद्युत,**
**उदोषधीर्जिहते पिन्वते स्वः।**
**इरा विश्वस्मै भुवनाय जायते,**
**यत्पर्जन्यः पृथिवीं रेतसावति॥4॥**

## 7.9. पुरुषसूक्तम् (ऋक्. 10.90)

ऋग्वेदस्य दशम-मण्डलस्य नवतितमं '**सहस्त्रशीर्षा**' इति षोडशर्चं सूक्तं '**पुरुष-सूक्तम्**' इत्यभिधानेन अभिधीयते। सूक्तस्यास्य नारायणो नाम ऋषिः। पुरुषो देवता। अनुष्टुप् छन्दः अन्त्या त्रिष्टुप् च। अव्यक्त-महदादिविलक्षणश्चेतनो यः पुरुषः '**पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः**'' (कठोपनिषद् 1.3.11) इत्यादि-श्रुतिषु प्रसिद्धः स देवता। परमात्मज्ञानानन्दादि-गुणाध्यात्मनि प्रभूतः पुरुषमेधो यज्ञः लोककालाग्न्यादिवपुः पुरुषोत्पत्ति-स्थिति-संहृतीनां हेतुः स्वर्गापवर्गैश्वर्य-मोक्षदो ज्ञानकर्मसमुच्चयकारणं शरीरं, यज्ञो वा अस्यात्मा भवतीति श्रुतिः। पुरि शेते इति पुरुषः यथोक्तं शतपथब्राह्मणे—''**अथ यस्मात् पुरुषमेधो नामेमे वै लोकाः पूरयमेव पुरुषोयोऽयं पवते सोऽस्यां पुरि शेते तस्मात् पुरुषः। तस्य यदेष लोकेष्वन्नं तदस्यान्नं मेधस्तदस्यैतदन्नं मेधस्तस्मात् पुरुषमेथः**''(श.ब्रा.13.6.2.1) इति। अथ च नारायण-नाम्ना पुरुषसूक्त-नाम्ना च व्यवह्रियमाणोऽनुवाकः उच्यते। ......... ब्रह्ममेधेऽपि प्रेतदाहोपस्थाने विनियोगं भरद्वाजः आह ''नारायणाभ्याम् उपस्थानम्'' इति।

**सहस्रशीर्षा पुरुषः, सहस्राक्षः सहस्रपात्।**
**स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलम्॥1॥**

भगवान् वेदपुरुषः आह, सहस्रशीर्षा। सर्वप्राणि-समष्टि- रूपो ब्रह्माण्ड-देहो विराडाख्यो यः पुरुषः सोऽयं सहस्रशीर्षा। सहस्र-शब्दस्य उपलक्षणत्वाद् अनन्तैः शिरोभिर्युक्तः इत्यर्थः। यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तः पातित्वात् तदीयान्येवेति सहस्रशीर्षत्वम्। एवं सहस्राक्षित्वं सहस्रपादत्वं च। सः पुरुषः भूमिं ब्रह्माण्ड-गोलकरूपां विश्वतः सर्वतः वृत्वा परिवेष्ट्य दशांगुलं दशांगुल-परिमितं देशम् अत्यतिष्ठद् अतिक्रम्य व्यवस्थितः। दश च तानि अंगुलानि दशांगुलानि इन्द्रियाणि। केचिदन्यथा रोचयन्ति, —दशांगुलप्रमाणं हृदयस्थानम्, यद्वा नाभेः सकाशाद् दशांगुलम् अतिक्रम्य हृदिस्थितः। अपरे तु नासिकाग्रं दशांगुलमिति। दशांगुलम् इत्युपलक्षणम्। ब्रह्माण्डाद् बहिरपि सर्वतो व्याप्य अवस्थितः इत्यर्थः।

**पुरुष एवेदं सर्वं, यद्भूतं यच्च भव्यम्।**
**उतामृतत्वस्येशानो, यदन्नेनातिरोहति॥2॥**

ऋषिः नारायणः आह, पुरुष एव। यदिदं वर्तमानं जगत् तत्सर्वं पुरुषः एव। यच्च भूतम् अतीतं जगत् यच्च भव्यं भविष्यं जगत् तदपि पुरुषः एव। यथास्मिन् कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्य अवयवाः, तथैव अतीतागामिनोरपि कल्पयोर्द्रष्टव्यमिति भावः। उत अपि च। अमृतत्वस्य देवस्य ईशानः स्वामी स पुरुषो यद् यस्माद् अन्नेन प्राणिनां भोग्येन अन्नेन फलेन निमित्तभूतेन अतिरोहति स्वीयां कारणावस्थाम् अतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात् पुरुषः एव प्राणिनां कर्मफलभोगाय जगद् अवस्थास्वीकारान्नेदं तस्य वस्तुत्वमित्यर्थः।

**एतावानस्य महिमातो, ज्यायाँश्च पूरुषः।**
**पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि॥3॥**

ऋषिः नारायणः आह, एतावानस्य। अतीत-अनागत-वर्तमानकाल-सम्बद्धं जगद् यावद् अस्ति, एतावान् सर्वोप्यस्य पुरुषस्य महिमा, स्वकीयसामर्थ्य-विशेषो विभूतिः, न तु तस्य वास्तवं स्वरूपम्। वास्तवस्तु पुरुषः अतो महिम्नोऽपि ज्यायान् अतिशयेन अधिकः। एतच्चोभयं स्पष्टीक्रियते। अस्य पुरुषस्य विश्वा सर्वाणि भूतानि काल-त्रयवर्तीनि प्राणि-जातानि पादश्चतुर्थोंशः। अस्य पुरुषस्य अवशिष्टं त्रिपात्स्वरूपम् अमृतं विनाश-रहितं सद् दिवि द्योतनात्मके स्वप्रकाश-स्वरूपे व्यवतिष्ठत् इति शेषः। यद्यपि ''**सत्यं ज्ञानमनन्तं ब्रह्म**'' (तैत्तिरीयोपनिषद् 2.1.) इत्याम्नातस्य परब्रह्मणः इयत्ताभावात् पादचतुष्टयं निरूपयितुम् शक्यं तथापि जगद् इदं ब्रह्म-स्वरूपापेक्षया अल्पम् इति विवक्षितत्वात् पादत्वोपन्यासः।

**त्रिपादूर्ध्व उदैत्पुरुषः, पादोऽस्येहाभवत् पुनः।**
**ततो विश्वङ्व्यक्रामत्, साशनानशने अभि॥4॥**

भगवान् वेदपुरुष आह, त्रिपादूर्ध्व। योऽयं त्रिपात् पुरुषः ब्रह्मस्वरूपः सोऽयं ऊर्ध्व उदैत्। अस्माद् अज्ञानकार्यात् संसाराद् बहिर्भूतोऽत्रत्यैर्गुण-दोषैरस्पृष्ट उत्कर्षेण स्थितवान्। तस्यास्य सोऽयं पादो लेशः सोऽयम् इह मायायां पुनः अभवत्। सृष्टि-संहाराभ्यां पुनः पुनरागच्छति। अस्य सर्वस्य जगतः परमात्म-लेशत्वं भगवताऽप्युक्तम्—''**विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्**'' (श्रीमद् भगवद्गीता. 10.42) इति। ततो मायायामागत्यानन्तरं विष्वङ् देव-मनुष्य-तिर्यगादि-रूपेण विविधः सन् व्यक्रामद् व्याप्तवान्। साशनानशने अभिलक्ष्य। साशनं भोजनादि व्यवहारोपेतं चेतनं प्राणिजातम्। अनशनं तद्रहितचेतनं गिरिनद्यादिकम्। तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः।

**तस्माद् विराळजायत, विराजो अधिपूरुषः।**
**स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥5॥**

ऋषिः नारायणः आह, तस्माद् विराट्। विश्वङ् व्यक्रामद् इति यदुक्तं तदेवात्र प्रपञ्च्यते। तस्माद् आदिपुरुषात् विराट् ब्रह्माण्डदेहः अजायत उत्पन्नः। विविधानि राजन्ते वस्तून्यत्रेति विराट्। विराजोऽधि विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा पुरुषः तद्देहाभिमानी कश्चित् पुमान् अजायत। सोऽयं सर्ववेदान्तवेद्यः परमात्मा स्वयमेव स्वकीयया मायया विराड्-देहं ब्रह्माण्ड-रूपं सृष्ट्वा तत्र जीव-रूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत्—''**स वा एष भूतानि इन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माययैव** (नृ. ता. 2.1.9.)

**नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।**
**पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्॥14॥**

भगवान् वेदपुरुषः आह, नाभ्या आसीदन्तरिक्षम्। यथा, चन्द्रादीन् प्रजापतेः मनः प्रभृतिभ्योऽकल्पयन् तथैव अन्तरिक्षादीन् लोकान् प्रजापतेः नाभ्यादिभ्यो देवाः अकल्पयन् उत्पादितवन्तः। एतदेव दर्शयति। नाभ्याः प्रजापतेर्नाभेः अन्तरिक्षम् आसीत्। शीर्ष्णः द्यौ समवर्तत उत्पन्नः। अस्य पद्भ्यां पादाभ्यां भूमिः उत्पन्ना। अस्य श्रोत्रात् दिशः उत्पन्नाः।

**सप्तास्यासन् परिधयस्त्रिःसप्त समिधः कृताः।**
**देवा यद्यज्ञं तन्वाना, अबध्नन् पुरुषं पशुम्॥15॥**

अस्य सांकल्पिक-यज्ञस्य गायत्र्यादीनि सप्त छन्दांसि परिधयः आसन्। ऐष्टिकस्य आहवनीयस्य त्रयः परिधयः उत्तर-वेदिकास्त्रयः आदित्यश्च सप्तमः परिधि-प्रतिनिधि रूपः अत एव आम्नायते,—"**न पुरस्तात् परिदधात्यादित्यो ह्येवोद्यन् पुरस्ताद् रक्षांसि अपहन्ति**" (तै. सं.2.6.6.3.) इति। तत एव आदित्यसहिताः सप्तपरिधयः अत्र सप्तछन्दोरूपाः। तथा समिधः त्रिःसप्त त्रिगुणीकृत-सप्तसंख्यकाः एकविंशति कृता। "**द्वादश मासाः पञ्चर्तवः त्रयः इमे लोका असावादित्य एकविंशः**" (तै. सं. 5.1.10.3.) इति श्रुता पदार्था एक विंशतिदारुयुक्तेध्मत्वेन भाविताः। यत् यः पुरुषो वैराजोऽस्ति तं पुरुषं देवाः प्रजापति-प्राणेन्द्रियरूपा यज्ञं तन्वानाः मानसं यज्ञं तन्वानाः कुर्वाणाः पशुम् अबध्नन् विराट्पुरुषमेव पशुत्वेन भावितवन्तः। एतदेवाभिप्रेत्य पूर्वत्र "**यत्पुरुषेण हविषा**" इत्युक्तम्।

**यज्ञेन यज्ञमयजन्त देवा,-**
**स्तानि धर्माणि प्रथमान्यासन्।**
**ते ह नाकं महिमानः सचन्त,**
**यत्र पूर्वे साध्याः सन्ति देवाः॥16॥**

पुरुषसूक्तस्य मन्त्रेऽस्मिन् पूर्व प्रपञ्चेन उक्तम् अर्थं संक्षिप्य अत्र दर्शयति देवाः प्रजापतिप्राणरूपाः यज्ञेन यथोक्तेन मानसेन संकल्पेन यज्ञं यथोक्तस्वरूपं प्रजापतिम् अयजन्त पूजितवन्तः। तस्मात् पूजनात् तानि प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धारकाणि प्रथमानि मुख्यानि आसन्। एतावता सृष्टि-प्रतिपादकसूक्तभागार्थः संगीहीतः। अथोपासनात् फलानुवादकभागार्थः संगृह्यते। यत्र यस्मिन् विराट्प्राप्तिरूपे नाके पूर्वे साध्याः पुरातनाविराडुपास्ति-साधकाः देवाः सन्ति तिष्ठन्ति तत् नाकं विराट्प्राप्तिरूपं स्वर्गं ते महिमानः तदुपासका महात्मानः सचन्त समवयन्ति प्राप्नुवन्ति।

## 7.10. पुरुरवा-उर्वशी-संवाद-सूक्तम् ( ऋग्वेद. 10.95 )

पुरुरवसि राजवर्षावप्सरास्तूर्वशी पुरा।
न्यवसत्संविदं कृत्वा तस्मिन् धर्म चचार च॥
तया तस्य च संवासमसूयन् पाकशासनः।
पैतामहं चानुरागमिन्द्रवच्चापि तस्य तु॥
स तयोस्तु तु वियोगार्थं पार्श्वस्थं वज्रमब्रवीत।
प्रीतिं भिन्द्धि तयोर्वज्र मम चेदिच्छसि प्रियम्॥
तथेत्युक्त्वा तयोः प्रीतिं वज्रोऽभिनत् स्वमायया।
ततस्तया विहीनस्तु चचारोन्मत्तवन्नृपः॥
चरन् सरसि सोऽपश्यदभिरूपामिवोर्वशीम्।
सखीभिरभिरूपाभिः पंचभिः पार्श्वतो वृताम्॥
तामाह पुनरेहीति दुःखात्सा त्वब्रवीन्नृपम्।
अप्राप्याहं त्वयाद्येहस्वर्गे प्राप्स्यसि मां पुनः॥

**—बृहद्देवता॥7.147—1**

**हये जाये मनसा तिष्ठ घोरे,**
**वचांसि मिश्रा कृणवावहै नु।**
**न नौ मन्त्रा अनुदितास एते,**
**मयस्करन् परतरे चनाहन्॥1॥**
**किमेता वाचा कृणवा तवाहं,**
**प्राक्रमिषमुषसामग्रियेव।**
**पुरुरवः पुनरस्तं परेहि,**
**दुरापना वात इवाहमस्मि॥2॥**
**इषुर्न श्रिय इषुधेरसना,**
**गोषाः शतसा न रंहिः।**
**अवीरे क्रतौ वि दविद्युतन्नोरा,**
**न मायुं चित्यन्त धुनयः॥3॥**
**सा वसु दधती श्वसुराय वय,**
**उषो यदि वष्ट्यन्तिगृहात्।**
**अस्तं ननक्षे यस्मिञ्चाकन्,**
**दिवा नक्तं श्नथिता वैतसेन॥4॥**
**त्रिः स्म माह्नः श्नथयो वैतसे—**
**नोत स्म मेऽव्यत्यै पृणासि।**
**पुरुवोऽनु ते केतमायं,**
**राजा मे वीर तन्व स्तदासीः॥5॥**
**या सुजूर्णिः श्रेणिः सुम्नआपि,**
**हृदेचक्षुर्न ग्रन्थिनी चरण्युः।**
**ता अञ्जयोऽरुणयो न सस्रुः,**
**श्रिये गावो न धेनवोऽनवन्त॥6॥**
**समस्मिञ्जायमान आसत,**
**ग्ना उतेमवर्धन्नद्यः स्वगूर्ताः।**
**महे यत्त्वा पुरुरवो रणा—**
**यावर्धयन् दस्युहत्याय देवाः॥7॥**

**निधिं बिभ्रती बहुधा गुहा वसुं,**
**मणिं हिरण्यं पृथिवी ददातु मे।**
**वसूनि नो वसुदा रासमाना,**
**देवी दधातु सुमनस्यमाना ॥44॥**

## 7.19. कालसूक्तम् (अथर्ववेद.19.53)

दश-मन्त्रात्मकस्य सूक्तस्यास्य भृगुः ऋषिः कालः देवता, त्रिस्टुप् बृहती अनुष्टुप् छन्दांसि। सूक्तेऽस्मिन् भृगुः कालस्य स्वरूपम् उपस्थापयन् आह, कालस्वरूपः अश्वः एव विश्वरथस्य वाहकः अस्ति। स कालः सप्तरश्मिः सहस्राक्षश्चास्ति। अन्यच्च स जरारहितः पराक्रमयुक्तश्चास्ति। भुवनान्येव तस्य विश्वरथस्य चक्राः सन्ति। इत्थं स कालः सप्तचक्राणां वाहकः अश्वरूपः अस्ति। स काल एव भुवनान्युद्भावयति गतिशीलं च करोति। विज्ञैः सः कालः अहर्निशात्मकः आकाशवत् निर्लेपश्च उच्यते। स काल एव सृष्टेः प्राक् सर्वेषां पितृरूपेण स्थितः आसीत्, इदानीं च स एव पुत्ररूपेण दरीदृश्यते। तस्मात् कालादुत्तमः नास्ति अन्यत् तेजः। कालो अमूं द्युलोकम् अजनयत्। तस्मात् कालादेव भूमिः, भूत-भविष्यत्-वर्तमान-कालः सर्वे प्राणिनश्च समुत्पन्नाः। मनः प्राणाः सर्वाणि नामानि च अस्मिन्नेव काले समाहितानि सन्ति। ते सर्वे यथासमयम् समुद्भूय प्रजारञ्जनं कुर्वन्ति। अन्यच्च तपः, शक्तिः, ज्येष्ठत्वं ब्रह्मविद्या च सर्वम् काले एव समाहितम् ओतञ्च प्रोतञ्च।

अतः काल एव सर्वेश्वरः। इत्थं कालप्रेरितं जगदिदं कालादेव समुद्भूय काले एव प्रतिष्ठितमस्ति। कालः एव ब्रह्म भूत्वा परमेष्ठिनम् प्रजापतिम् अपि धारयतीति।

**कालो अश्वो वहति सप्तरश्मिः,**
**सहस्राक्षो अजरो भूरिरेताः।**
**तमा रोहन्ति कवयो विपश्चित-**
**स्तस्य चक्रा भुवनानि विश्वा ॥1॥**
**सप्तचक्रान् वहति काल एष,**
**सप्तास्य नाभीरमृतं न्वक्षः।**
**स इमा विश्वा भुवनान्यञ्जत्,**
**कालः स ईयते प्रथमो नु देवः ॥2॥**
**पूर्णः कुम्भोऽधि काल आहितस्तं,**
**वै पश्यामो बहुधा नु सन्तः।**
**स इमा विश्वा भुवनानि प्रत्यङ्,**
**कालं तमाहुः परमे व्योमन् ॥3॥**
**स एव सं भुवनान्याभरत्,**
**स एव सं भुवनानि पर्यैत्।**
**पिता सन्नभवत् पुत्र एषां,**
**तस्माद् वै नान्यत् परमस्ति तेजः ॥4॥**
**कालोऽमूं दिवमजनयत्,**
**काल इमाः पृथिवीरुत।**
**कालो ह भूतं भव्यं,**
**चेषितं ह वि तिष्ठते ॥5॥**
**कालो भूतिमसृजत,**
**काले तपति सूर्यः।**
**काले ह विश्वा भूतानि,**
**काले चक्षुर्विपश्यति ॥6॥**
**काले मनः काले प्राणः,**
**काले नाम समाहितम्।**
**कालेन सर्वा नन्द-,**
**न्त्यागतेन प्रजा इमाः ॥7॥**
**काले तपः काले ज्येष्ठं,**
**काले ब्रह्म समाहितम्।**
**कालो ह सर्वस्येश्वरो,**
**यः पितासीत् प्रजापतेः ॥8॥**
**तेनेषितं तेन जातं,**
**तदु तस्मिन् प्रतिष्ठितम्।**
**कालो ह ब्रह्म भूत्वा,**
**बिभर्ति परमेष्ठिनम् ॥9॥**
**कालः प्रजा असृजत,**
**कालो अग्रे प्रजापतिम्।**
**स्वयम्भूः कश्यपः कालात्,**
**तपः कालादजायत ॥10॥**

# 8. ब्राह्मण-साहित्यम्
## (Brahmana Literature)

ग्रन्थवाचकस्य ब्राह्मण-शब्दस्य नपुंसकलिंगे एव भवति प्रयोगः, यथोक्तं—**ब्राह्मणं ब्रह्मसंघाते वेदभागे नपुंसकम्।** ब्राह्मण-शब्दस्यप्रयोगः सर्वप्रथमम् तैत्तिरीयसंहितायाम् उपलभ्यते।

ब्राह्मण-साहित्यमतीव विशालं व्यापकञ्चास्ति। यद्यपि साम्प्रतं ब्राह्मण-साहित्यस्य महान् भागो नहि समुपलभ्यते, तथापि समुपलभ्यमानं ब्राह्मण-साहित्यं महत्त्वातिशयं बिभर्ति। ये ब्राह्मणग्रन्थाः विनष्टाः सन्ति तेषां कतिपयानि उदाहरणानि कतिपयेषु श्रौतग्रन्थेषु समुपलभ्यन्ते।

अनुपलभ्यमानेषु ब्राह्मणग्रन्थेषु शाकटायन-ब्राह्मणम् अत्यन्त-महत्त्वपूर्णम् अस्ति। अस्य ग्रन्थस्य सप्ततिः उद्धरणानि अद्यापि समुपलभ्यन्ते। एतान्युद्धरणानि शतपथ-ब्राह्मणस्य सायणभाष्ये, ताण्ड्य-ब्राह्मणस्य च सायणभाष्ये समुपलभ्यन्ते।